# Ekadantasharanagatistotram

# એકદન્તશરણાગતિસ્તોત્રમ્

## Document Information

Text title : ekadantasharaNaagatistotram

File name : ekadantasharaNaagatistotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Author : Traditional

Transliterated by : Karthik Chandan.P (kardan5380 at yahoo.com) : Amith K Nagaraj

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : mudgalapurANa

Latest update : September 12, 2004

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2020

*sanskritdocuments.org*

# એકદન્તશરણાગતિસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
દેવર્ષય ઊચુઃ ।
સદાત્મરૂપં સકલાદિભૂતમમાયિનં સોઽહમચિન્ત્યબોધમ્ ।
અનાદિમધ્યાન્તવિહીનમેકં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧॥

અનન્તચિદ્રૂપમયં ગણેશમભેદભેદાદિવિહીનમાદ્યમ્ ।
હૃદિ પ્રકાશસ્ય ધરં સ્વધીસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૨॥

સમાધિસંસ્થં હૃદિ યોગિનાં યં પ્રકાશરૂપેણ વિભાતમેતમ્ ।
સદા નિરાલમ્બસમાધિગમ્યં તમેકદન્તં શરણં વ્રજામઃ ॥ ૩॥

સ્વબિમ્બભાવેન વિલાસયુક્તાં પ્રત્યક્ષમાયાં વિવિધસ્વરૂપામ્ ।
સ્વવીર્યકં તત્ર દદાતિ યો વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૪॥

ત્વદીયવીર્યેણ સમર્થભૂતસ્વમાયયા સંરચિતં ચ વિશ્વમ્ ।
તુરીયકં હ્યાત્મપ્રતીતિસંજ્ઞં તમેકદન્તં શરણં વ્રજામઃ ॥ ૫॥

સ્વદીયસત્તાધરમેકદન્તં ગુણેશ્વરં યં ગુણબોધિતારમ્ ।
ભજન્તમત્યન્તમજં ત્રિસંસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૬॥

તતસ્વયા પ્રેરિતનાદકેન સુષુપ્તિસંજ્ઞં રચિતં જગદ્વૈ ।
સમાનરૂપં હ્યુભયત્રસંસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૭॥

તદેવ વિશ્વં કૃપયા પ્રભૂતં દ્વિભાવમાદૌ તમસા વિભાન્તમ્ ।
અનેકરૂપં ચ તથૈકભૂતં તમેકદન્તં શરણં વ્રજામઃ ॥ ૮॥

તતસ્ત્વયા પ્રેરિતકેન સૃષ્ટં બભૂવ સૂક્ષ્મં જગદેકસંસ્થમ્ ।
સુસાત્વિકં સ્વપ્નમનન્તમાદ્યં તમેકદન્તં શરણ વ્રજામઃ ॥ ૯॥

તદેવ સ્વપ્નં તપસા ગણેશ સુસિદ્ધરૂપં વિવિધં બભૂવ ।
સદૈકરૂપં કૃપયા ચ તેઽદ્ય તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૦॥

ત્વદાજ્ઞયા તેન ત્વયા હૃદિસ્થં તથા સુસૃષ્ટં જગદંશરૂપમ્ ।
વિભિન્નજાગ્રન્મયમપ્રમેયં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૧॥

તદેવ જાગ્રદ્રજસા વિભાતં વિલોકિતં ત્વત્કૃપયા સ્મૃતેન ।
બભૂવ ભિન્નં ચ સદૈકરૂપં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૨॥

સદેવ સૃષ્ટ્વા પ્રકૃતિસ્વભાવાત્તદન્તરે ત્વં ચ વિભાસિ નિત્યમ્ ।
ધિયઃ પ્રદાતા ગણનાથ એકસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૩॥

ત્વદાજ્ઞયા ભાન્તિ ગ્રહાશ્ચ સર્વે  પ્રકાશરૂપાણિ વિભાન્તિ ખે વૈ ॥

ભ્રમન્તિ નિત્યં સ્વવિહારકાર્યાસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૪॥

ત્વદાજ્ઞયા સૃષ્ટિકરો વિધાતા ત્વદાજ્ઞયા પાલક એવ વિષ્ણુઃ ।
ત્વદાજ્ઞયા સંહરકો હરોઽપિ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૫॥

યદાજ્ઞયા ભૂમિજલેઽત્ર સંસ્થે યદાજ્ઞયાપઃ પ્રવહન્તિ નદ્યઃ ।
સ્વતીર્થસંસ્થશ્ચ કૃતઃ સમુદ્રસ્તમેકદન્તં શરણં વ્રજામઃ॥ ૧૬॥

યદાજ્ઞયા દેવગણા દિવિસ્થા દદન્તિ વૈ કર્મફલાનિ નિત્યમ્ ।
યદાજ્ઞયા શૈલગણાઃ સ્થિરા વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૭॥

યદાજ્ઞયા શેષધરાધરો વૈ યદાજ્ઞયા મોહપ્રદશ્ચ કામઃ ।
યદાજ્ઞયા કાલધરોઽર્યમા ચ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૮॥

યદાજ્ઞયા વાતિ વિભાતિ વાયુર્યદાજ્ઞયાગ્નિર્જઠરાદિસંસ્થઃ ।
યદાજ્ઞયેદં સચરાચરં ચ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૯॥

યદન્તરે સંસ્થિતમેકદન્તસ્તદાજ્ઞયા સર્વમિદં વિભાતિ ।
અનન્તરૂપં હૃદિ બોધકં યસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૦॥

સુયોગિનો યોગબલેન સાધ્યં પ્રકુર્વતે કઃ સ્તવનેન સ્તૌતિ ।
અતઃ પ્રણામેન સુસિદ્ધિદોઽસ્તુ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૧॥

ગૃત્સમદ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં દેવાઃ સમુનયઃ પ્રભુમ્ ॥

તૂષ્ણીમ્ભાવં પ્રપદ્યૈવ નનૃતુર્હર્ષસંયુતાઃ ॥ ૨૨॥

સ તાનુવાચ પ્રીતાત્મા દેવર્ષીણાં સ્તવેન વૈ ॥

એકદન્તો મહાભાગો દેવર્ષીન્ ભક્તવત્સલઃ ॥ ૨૩॥

એકદન્ત ઉવાચ ।
સ્તોત્રેણાઽહં પ્રસન્નોઽસ્મિ સુરાઃ સર્ષિગણાઃ કિલ ।
વરદં ભો વૃણુત વો દાસ્યામિ મનસીપ્સિતમ્ ॥ ૨૪॥

ભવત્કૃતં મદીયં યત્સ્તોત્રં પ્રીતિપ્રદં ચ તત્ ।
ભવિષ્યતિ ન સન્દેહઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૫॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
પુત્રપૌત્રાદિકં સર્વં કલત્રં ધનધાન્યકમ્ ॥ ૨૬ ।
ગજાશ્વાદિકમત્યન્તં રાજ્યભોગાદિકં ધ્રુવમ્ ।
ભુક્તિં મુક્તિં ચ યોગં વૈ લભતે શાન્તિદાયકમ્ ॥ ૨૭॥

મારણોચ્ચાટનાદીનિ રાજ્યબન્ધાદિકં ચ યત્ ।
પઠતાં શ‍ૃણ્વતાં નૃણાં ભવેચ્ચ બન્ધહીનતામ્ ॥ ૨૮॥

એકવિંશતિવારં યઃ શ્લોકાનેવૈકવિંશતીન્ ।
પઠેચ્ચ હૃદિ માં સ્મૃત્વા દિનાનિ ત્વેકવિંશતિઃ ॥ ૨૯॥

ન તસ્ય દુર્લભં કિઞ્ચિત્રિષુ લોકેષુ વૈ ભવેત્ ।
અસાધ્યં સાધયેન્મર્ત્યઃ સર્વત્ર વિજયી ભવેત્ ॥ ૩૦॥

નિત્યં યઃ પઠતિ સ્તોત્રં બ્રહ્મભૂતઃ સ વૈ નરઃ ।
તસ્ય દર્શનતઃ સર્વે દેવાઃ પૂતા ભવન્તિ ચ ॥ ૩૧॥

ઇતિ શ્રીમુદ્ગલપુરાણે એકદન્તશરણાગતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)
Proofread by Ravin Bhalekar (ravibhalekar@hotmail.com), NA

*Ekadantasharanagatistotram*

pdf was typeset on November 21, 2020

Please send corrections to *sanskrit@cheerful.com*